# शब्दशक्तिप्रकाशिकादिशा लक्षकनामविचारः

**- Dr E M RAJAN**
Prof. Sahitya
Central Sanskrit University
Guruvayur Campus

"जगदीशस्य सर्वस्वं शब्दशक्तिप्रकाशिकाम् इत्युक्तिरन्वर्था । तत्र कारणं ग्रन्थमहत्त्वे ग्रन्थरचनाशैलिश्च । महत्त्वं विषयगरिम्णा कातन्त्र-व्याकरणाश्रयत्वेन च । न कोऽपि संस्कृतशास्त्रकारः कातन्त्रव्याकरणमाश्रित्य ग्रन्थं निर्मिमे । अपि च स्वनिर्मितकारिकया वृत्त्या च ग्रन्थोऽयं निर्मितः । व्याकरणविषयेषु नैयायिकानां दृष्टिः कीदृशीति अत्र प्रतिपादितम् । प्रकृते नाम्नः रूढ-लक्षक-योगरूढ-यौगिकेषु भेदेषु लक्षकनामात्र विचार्यते । नामभेदप्रतिपादिका

**रूढञ्च लक्षकश्चैव योगरूढञ्च यौगिकम् ।**
**तच्चतुर्धा परै रूढयौगिकं मन्यतेऽधिकम् ।।**

तत्र रूढं निरूप्यावसरप्राप्तं लक्षकं नाम निरूप्यते । यथा,

**यादृशार्थस्य संबन्धवत्ति शक्तन्तु यद्भवेत् ।**

**तत्र तल्लक्षकं नाम तच्छक्तिविधुरं पदम् ।।**

यादृशेत्यनेन लक्ष्यार्थः ग्राह्यः, तत्संबन्धवति शक्तं यत्पदं भवेत् , तत्र तस्मिन्नर्थे तत् लक्षकं नाम, विशेष उच्यते । तस्मिन् शक्तिः नास्ति चेत् । तच्छक्तिविधुरमिति दलस्येदं प्रयोजनं यत्सैन्धवपदं लवण इवाश्वेऽपि शक्तं, परम् अन्यतरस्य लक्ष्यार्थत्वं नास्ति, अतः सैन्धवपदं न लक्षकम् ।

गङ्गायां घोष इत्यत्र यादृशार्थः तीरं तत्र सामीप्यरूपसंबन्धवति प्रवाहे शक्तं गङ्गापदमिति गङ्गापदं लक्षकं भवति । तत्र तीरे शक्तिर्नास्तीति तच्छक्तिविदुरमस्ति । शक्तत्वे निमित्तं पूर्वपूर्वप्रयुक्तत्वम् ।

**लक्षणाभेदाः**

तत्रेयं कारिका -

जहत्स्वार्थाजहत्स्वार्थनिरूढाधुनिकादिकाः लक्षणा विविधास्ताभिर्लाक्षकं स्यादनकेधा । इति ।

जहत्स्वार्थादिभेदेन लक्षणा बहुविधा अत एव लक्षकं नामापि बहुविधम्। इत्थञ्च लक्षणाभेदः लक्षकनाम्नो भेदे निमित्तम् ।

जहत्स्वार्थलक्षणा :- जहत् स्वार्थं स्वाश्रयशक्यं यस्याः सेति बहुव्रीहिः । अर्थाद्या लक्षणा लक्षकशब्दार्थं

परित्यज्य शाब्दबोधं जनयति सा जहत्स्वार्था। यथा गङ्गायां घोषः । अत्र लक्षकशब्दः गङ्गा - शक्यार्थः प्रवाहविशेषः। लक्ष्यार्थस्तीरमिति लक्षणा स्वगङ्गाशब्दार्थं प्रवाहविशेषरूपं परित्यज्य सप्तमीविभक्त्यर्थेन अधिकरणत्वेनान्वयं प्राप्नोति ।

अजहत्स्वार्थलक्षणा :- न जहातीत्यजहत् स्वार्थं स्वाश्रयशक्यं यस्याः सा । अर्थाद्या लक्षणा लक्षकशब्दार्थमपरित्यज्य शाब्दबोधं जनयति साऽजहत्स्वार्था। उदाहरणं गङ्गायां घोष इत्येव । लक्ष्यार्थः गङ्गातीरे घोषः । अत्र गङ्गाशब्दार्थं प्रवाहरूपं न परित्यजति ।

निरूढलक्षणा - लक्ष्यतावच्छेदकीभूततत्तद्रूपेण पूर्वं पूर्वं प्रत्यायकत्वम्। यथा अरुणया गवा सोमं क्रीणाति । अत्र आरूण्यप्रकारेण तदाश्रयगोद्रव्यानुभावकत्वमस्तीति अरुणाशब्दः ।

आधुनिकलक्षणा :- पूर्वं पूर्वं ताद्रूप्येणाप्रत्यायकत्वादाधुनिकी - यथा घटत्वादिना पटादिपदस्य अर्थात् घटत्वावच्छिन्ना पटपदस्य गौणलक्षणा कारिकस्थादिपदेन गौणी लक्षणा सादृश्याल्लक्षणा गौणीति यावत् । यथाऽग्निर्माणवकः । अत्र तैक्ष्ण्यं सादृश्यं संबन्धः । अग्निपदमग्निसदृशे लाक्षणिकम् ।

**नानामतदूषणम् -**

मीमांसकाः वाक्यमपि लक्षकमित्युदाहरन्ति गभीरायां नद्यां घोष इति । तेषामियं युक्तिः । प्रकृते पदपक्षे लक्षकं किमिति विचारणीयम् - नदीपदं तीरलक्षकमिति चेत् न हि तीरं गभीरमिति गभीरायामित्यनेन संबन्धः न स्यात् , नापि गभीरपदं तीरलक्षकम् , न हि तीरं नदीति नदीपदेनान्वयः न स्यात् । अतः वाक्यं गभीरनदीतीरे लाक्षणिकम् ।

अत्रोच्यते - गभीरायां नद्यामिति विभक्त्यन्तभागस्य लाक्षणिकत्वे घोषादावाधेयत्वेनान्वयो न स्यात् - समासादन्यत्र नामार्थयोः भेदेनान्वयस्याव्युत्पन्नत्वात् । नापि तीरवृत्तितापर्यन्तं लक्ष्यार्थः - अभेदेनान्वयो न स्यात् । समासभिन्नस्थले नामार्थयोरभेदेनान्वये नाम्नोस्समानविभक्तिकत्वं तन्त्रम् । नापि गभीरायां नदीति भागः तीरलक्षकः । तदर्थे विभक्त्यर्थस्यान्वयो न स्यात् । न हि स भागः प्रकृतिः , येन तदर्थे विभक्त्यर्थस्यान्वयः स्यात् । अतः गभीरपदं नदीपदं वा गभीरनदीतीरार्थे लक्षकमन्यतरपदतात्पर्यग्राहकमिति नैयायिकसिद्धान्तः ।

**आलङ्कारिकाः**

व्यञ्जनेति वृत्यन्तरं स्वीकृत्य लक्षणाऽभिधामूलाभ्यां द्विधा विभजन्ते । तत्र लक्षणामूल-व्यञ्जनामुदाहरति "मुखं विकसितम् " इति । अत्र विकासः पुष्पे संबद्ध इति मुखेऽसंबद्ध इति विकसितपदं लक्षणया विस्तृतं लक्षयत्, व्यञ्जनया कुसुमतुल्यसौरभादिमत्त्वं व्यनक्ति ।

अभिधामूला तत्र प्रवर्तते यत्र नानार्थकशब्दस्थले संयोगाद्यैरभिधायां नियन्त्रितायां शक्यार्थातिरिक्तमर्थान्तरं प्रतीयते । यथा " अयं गौरविलो महान्" । अत्र वक्ता कञ्चनपुरुषं स्तौतीति । अयं गौरविलः पूज्य इत्यर्थः । अभिधया प्रतीयते परं अयं गौः वृषभः अवेलः मेषतः इत्यर्थः अभिधामूलया प्रतीयते । अत्र कोशः "अवयः

शैलमेषार्का” इति । वस्तुतस्तु अर्थान्तरबोधः मानसिको भवितुमर्हतीति न वृत्यन्तरं स्वीकर्तव्यम् ।

------------